केवल अभ्यास हेतु नमूना प्रश्न पत्र

**Sample Question Paper for Practice only**

हाईस्कूल परीक्षा – 2024

**High School Examination – 2024**

विषय – संस्कृत

**Subject – Sanskrit**

| Total Question | Total Printed Pages | Time | Maximum Marks |
|---|---|---|---|
| 23 | 07 | 3:00 Hours | 75 |

निर्देशा :– (i) सर्वे प्रश्नाः निर्देशानुसारेण अनिवार्याः सन्ति।
(ii) प्रश्नानां सम्मुखे अङ्•काः प्रदत्ताः।

01. उचितं विकल्पं चित्वा लिखत। 1 X 6 = 6

(क) 'रामस्य' इत्यस्मिन् पदे विभक्तिः अस्ति।
(i) प्रथमा (ii) षष्ठी
(iii) पंचमी (iv) सप्तमी

(ख) 'कवि' शब्दस्य द्वितीया विभक्तेः बहुवचनस्य रूपम् अस्ति।
(i) कविः (ii) कवयः
(iii) कविना (iv) कवीन्

(ग) 'पित्रा' इत्यस्मिन् पदे वचनम् अस्ति।
(i) एकवचनम् (ii) बहुवचनम्
(iii) द्विवचनम् (iv) अन्यवचनम्

(घ) षष्ठी विभक्तिः एकवचनं शब्दरूपं अस्ति।
(i) साधुभिः (ii) तस्य
(iii) राज्ञा (iv) भवति

(ङ) अधोलिखितेषु अव्ययं नास्ति।
(i) अत्र (ii) तत्र
(iii) कुत्र (iv) पुत्रः

(च) 'पशुना अपि उदीरितः अर्थः गृह्यते' अस्मिन् वाक्ये अव्ययम् अस्ति।
(i) पशुना (ii) अपि
(iii) उदीरितः (iv) अर्थः



Downloaded from cclchapter.com

02. रिक्तस्थानपूर्तिं कुरूत। (कोऽपि षट् प्रश्नाः) 1 X 6 = 6

(क) 'नेष्यामः' इत्यस्मिन् पदे ...................... धातुः अस्ति। (नी / नम्)
(ख) 'घ्नन्ति' इत्यस्मिन् पदे ...................... वचनम् अस्ति। (बहुवचनं / एकवचनं)
(ग) 'वर्धताम्' इत्यस्मिन् पदे ...................... पुरूषः अस्ति। (मध्यमपुरूषः / प्रथमपुरूषः)
(घ) 'गच्छानि' इत्यस्मिन् पदे ...................... लकारः अस्ति। (लट् / लोट्)
(ड़) 'अधिकारः' इत्यस्मिन् पदे ...................... उपसर्गः अस्ति। (अधि / अ)
(च) 'सम्' उपसर्गः + 'कृत' योगे .......................... भवति। (समकृत / संस्कृत)
(छ) 'गम्' धातोः लृट् लकारस्य एकवचने प्रथमपुरूषे ..................रूपं भवति। (गमिष्यामि / गमिष्यति)
(ज) 'खगः गगने उत्पतति' अस्मिन् वाक्ये ......................... उपसर्गः अस्ति। (उद् / उत्)

03. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत। (कोऽपि षट्) 1 X 6 = 6

(क) 'उत् + ज्वलः' इत्यस्य संधिः उज्ज्वलः अस्ति।
(ख) दीर्घसंधेः उदाहरणम् सैव अस्ति।
(ग) 'प्रत्येकः' इत्यस्य संधि विच्छेदः 'प्रति+एकः' अस्ति।
(घ) 'शिवोवन्द्यः' अस्मिन् पदे हल् संधि अस्ति।
(ड़) 'बहुव्रीहिः' समासस्य उदाहरणं दिगम्बरः अस्ति।
(च) 'अनुरूपम्' पदस्य समासविग्रहः 'रूपस्य योग्यम्' भवति।
(छ) 'महान् चासौ देवः' इत्यस्य सामासिकपदं महादेवः भवति।
(ज) द्विगुः समासस्य उदाहरणम् 'अष्टाध्यायी' अस्ति।

04. युग्ममेलनं कुरूत। 1 X 6 = 6

| (क) | | (ख) | |
|---|---|---|---|
| (क) | 'सलिलम्' पर्याय पदं | (i) | आद्रता |
| (ख) | 'समरूपः' विशेष्य पदं | (ii) | द्रुतम् |
| (ग) | 'वृषभम्' विशेषण पदं | (iii) | प्रवासः |
| (घ) | 'शीघ्रम्' पर्याय पदं | (iv) | विपन्नम् |
| (ड़) | 'प्रसीदति' विलोम पदं | (v) | प्रकुप्यति |
| (च) | 'सम्पन्नम्' विलोम पदं | (vi) | दुर्बलम् |
| | | (vii) | जलम् |
| | | (viii) | कुटुम्ब वृत्तान्तः |



Downloaded from cclchapter.com

05. एकपदेन उत्तरं लिखत। (कोऽपि षट्) 1 X 6 = 6

(क) कः पिपासितः म्रियते ?
(ख) कीदृशाः प्राणिनः भूकम्पेन निहन्यन्ते ?
(ग) प्राणेभ्योऽपि कः रक्षणीयः ?
(घ) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते ?
(ङ) 'धर्म+ठक्' = किम् भवति ?
(च) 'आदाय' इत्यस्मिन् पदे प्रत्ययः अस्ति।
(छ) 'शतृ' प्रत्यययुक्तं पदम् 'गम्' धातोः किम् अस्ति ?
(ज) 'अहम् पठितुम् गच्छामि' इत्यस्मिन् पदे तुमुन् प्रत्ययः कस्मिन् पदे अस्ति।

06. अस्माकं पर्यावरणे किं किं दूषितम् अस्ति ? 2

अथवा

लोके महतो भयात् कः मुच्यते ?

07. रामः लवकुशौ कुत्र उपवेशयितुम् कथयति ? 2

अथवा

मातुः अधिका कृपा कस्मिन् भवति ?

08. वसन्तस्य गुणं कः जानाति ? 2

अथवा

मयूरः कथं नृत्यमुद्रायां स्थितः भवति ?

09. निर्धनः जनः कथं वित्तम् उपार्जितवान् ? 2

अथवा

आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात् ?

10. पृथिव्याः स्खलनात् किं जायते ? 2

अथवा

सरसः शोभा केन भवति ?

11. रेखाङि्कत – पदमाधृत्य प्रश्ननिर्माणं कुरूत । (केचित् द्वे) 1 X 2 = 2

(क) शकटीयानम् <u>कज्जलमलिनं</u> धूमं मुञ्चति।
(ख) त्वं <u>मानुषात्</u> विभेषि।
(ग) <u>धेनूनाम्</u> माता सुरभिः आसीत्।
(घ) सर्वे <u>प्रकृतिमातरं</u> प्रणमन्ति।



Downloaded from cclchapter.com

12. अधोलिखितानि वाक्यानि कः कं प्रति कथयति। (केचित् द्वे) 1 X 2 = 2

(क) जानाम्यहं तस्य नामधेयम्।
(ख) तस्या द्वे नाम्नी।
(ग) सव्यवधानं न चारित्र्यलोपाय।
(घ) भवान् कुतः भयात् पलायितः।

13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् एकम् श्लोकम् लिखत। 1 X 2 = 2

14. अधोलिखितानां वाक्यानां अशुद्धकारकसंशोधनम् कुरूत। (केचित् द्वे) 1 X 2 = 2

(क) शिष्यः गुरूः प्रश्नं पृच्छति।
(ख) सः कर्णम् बधिरः अस्ति।
(ग) हरि नमः।
(घ) सज्जनः पापम् जुगुप्सते।

15. समुचितपदेन रिक्तस्थानानि पूरयत। (केचित् चत्वारः) ½ X 4 = 2

(क) काकः ............................................ भवति।
(ख) ................................. परभृत् अपि कथ्यते।
(ग) मयूरः .................. इति नाम्नाऽपि ज्ञायते।
(घ) ............................ हि शत्रुः प्रथमो नराणां।
(ङ) उदीरतोऽर्थः ................................ गृह्यते।
(च) धैर्यवान् .................... परिभवं न प्राप्नोति।

16. अधोलिखितानि वाक्यानि कथा क्रमानुसारेण योजयत। (केचित् चत्वारि) ½ X 4 = 2

(क) पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।
(ख) गच्छ वत्से। सर्वं भद्रं जायेत।
(ग) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्।
(घ) सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।
(ङ) वृषभौ नीत्वा गृहमागत।
(च) सर्वेष्वपत्येषु जननी तुल्यवत्सला।

17. वाच्यपरिवर्तनं कुरूत। (केचित् द्वे) 1X 2 = 2

(क) त्वया सत्यं कथितम्।
(ख) सिंहः सर्वजन्तून् पृच्छति।
(ग) पशुः उदीरितम् अर्थम् गृह्णाति।
(घ) तेन एवं वह्निना शरीरं दह्यते।



Downloaded from cclchapter.com

18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। 1X 3 = 3

कश्चित् कृषक बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत् । तथापि वृषभः नोत्थितः।

(क) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ?
(ख) तयोः बलीवर्दयोः एकः कीदृशः आसीत् ?
(ग) 'अकरोत्' इत्यस्य पदस्य लकारं पुरूषं वचनम् च लिखत।

अथवा

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। कदा स पिता तनूजस्य रूग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

(क) एकदा स पिता कथं व्याकुलो जातः ?
(ख) किमर्थं स बसयानं विहाय पदातिरेव प्राचलत् ?
(ग) कः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ?

19. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। 1X 3 = 3

विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते।।

(क) के लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ?
(ख) विद्वांस एव कुत्र चक्षुष्मन्तः प्रकीर्तिताः ?
(ग) केषां वदने चक्षुर्नामनी मत ?

अथवा

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरूषः नास्ति योजकस्तत्र दुर्लभः ।।

(क) अयोग्यः कः नास्ति ?
(ख) कः तत्र दुर्लभः ?
(ग) अनौषधं किम् नास्ति ?



Downloaded from cclchapter.com

20. अधोलिखितं नाट्यांशं प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। 1X 3 = 3

लवः – भगवान् सहस्त्रदीधितिः।
रामः – कथमस्मत्समानाभिजनौ संवृत्तौ ?
विदूषकः – किं द्वयोरप्येकमेव प्रतिवचनम् ?
लवः – भ्रातरावावां सोदर्यौ।
रामः – समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्
लवः – आवां यमलौ।
रामः – सम्प्रति युज्यते । किं नामधेयम् ?

(क) कौ आवां सोदर्यौ ?
(ख) कथं शरीरसन्निवेशः ?
(ग) आवां कौ ?

अथवा

काकः– रे परभृत्! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करूणापरः पक्षिसम्राट काकः।
गजः– समीपतः एवागच्छन् अरे ! अरे! सर्वं सम्भाषणं श्रृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः, कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्व शुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।
(क) करूणापरः पक्षिसम्राट कः अस्ति ?
(ख) '' अहं विशालकायः बलशाली, पराक्रमी च'' इति कः अवदत् ?
(ग) 'पोथयित्वा' इत्यस्मिन् पदे कः प्रत्ययः ?

21. अधोलिखितम् अपठितं गद्यांशं प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत। 4

छात्रजीवनमेव मानवजीवनस्य प्रभातवेला आधारशिला व वर्तते। विद्याध्ययनाय छात्रः विद्यालयं गच्छति। सः सर्वविधं सुखं परित्यज्य अहर्निशं विद्याध्ययनं करोति। विद्यार्थी अल्पाहारी गृहत्यागी काकचेष्टावान् बकध्यानयुक्तः अल्पनिद्रालुश्च भवेत्। यथोक्तं केनापि कविना –

काकचेष्टा बकोध्यानं श्वान निद्रा तथैव च।
अल्पहारी, गृहत्यागी विद्यार्थी पंच लक्षणं।।

(क) मानजीवनस्य आधारशिला किम् अस्ति ?
(ख) छात्रः कुत्र गच्छति।
(ग) अस्य गद्यांशस्य शीर्षकं लिखत।
(घ) विद्यार्थीजीवनस्य पञ्च लक्षणं लिखत।


Downloaded from cclchapter.com

22. स्वप्राचार्यस्य कृते अवकाशार्थम् एकं आवेदनपत्रम् संस्कृतभाषायां लिखत। 4

अथवा

स्वमित्रं प्रति एकं शुभकामनापत्रम् संस्कृतभाषायां लिखत।

23. अद्योलिखितेषु एकं विषयं स्वीकृत्य संस्कृतभाषायां निबन्धं लिखत। 4

(क) सत्सङ्•गतिः
(ख) छात्रजीवनम्
(ग) संस्कृतभाषायाः महत्त्वम्
(घ) अस्माकं विद्यालयं

———————————xxx———————————



Downloaded from cclchapter.com